नयोश्चैव तथैवार्द्धुषिकस्य च। दीक्षितस्य कदर्य्यस्य बद्धस्य निगडस्य च। अभिशस्तस्य षण्डस्य पुंश्चल्या दाम्भिकस्य च। चिकित्सकस्य मृगयोः क्रूरस्योच्छिष्टभोजिनः। उग्रान्नं सूतिकान्नञ्च पर्य्याचान्तमनिर्द्दशम्। शुक्तं पर्य्युषितं चैव शूद्रोच्छिष्टं तथैव च। अनर्चितं वृथामांसमवीरायाश्च योषितः। द्विषदन्नं नगर्य्यन्नम् पतितान्नमवक्षुतम्। पिशुनानृतिनोश्चान्नं क्रतुविक्रयिणस्तथा। शैलूषतुन्नवायान्नं कृतघ्नस्यान्नमेव च। कर्म्मारस्य निषादस्य रङ्गावतारकस्य च। सुवर्णकर्त्तुर्वैणस्य शस्त्रविक्रयिणस्तथा श्ववतां शौण्डिकानाञ्च चैलनिर्णेजकस्य च। रजकस्य नृशंसस्य यस्य चोपपतिर्गृहे। मृष्यन्ति ये चोपपतिं स्त्रीजितानाञ्च सर्वशः। अनिर्द्दशञ्च प्रेतान्नमतुष्टिकरमेव च। राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम्। आयुः सुवर्णकारान्नं यशश्चर्म्मावकर्त्तिनः। कारुकान्नं प्रजा हन्ति बलं निर्णेजकस्य च। गणान्नं गणिकान्नं च लोकेभ्यः परिकृन्तति। पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम्। विष्ठा वार्द्धुषिकस्यान्नं शस्त्रविक्रयिणोमलम्। भुक्त्वा चान्यतमस्यान्नममत्या क्षपणं त्र्यहम्। मत्या भुक्त्वा चरेत् कृच्छ्रं रेतोविण्मूत्रमेव च। नाद्यात् शूद्रस्य पक्वान्नं विद्वानश्राद्धिनोद्विजः। आददीताममेवास्माद् वृत्तावेकरात्रिकम्" मनुः। 'केशकीटावपन्नं केशकीटैः सह पक्वम्। घुष्टान्नं "कोभोक्ता:"इत्युक्त्वा सत्रादौ यदन्नं दीयते तत्। गणान्नं बहुभिर्मिलित्वा यद्भोज्यं क्रियते तत्। दीक्षितस्य दीक्षणीययागानन्तरमा यज्ञसमाप्तेः अन्नमभक्ष्यम्। बद्धस्य रज्ज्वादिना। निगडस्य अर्श० आ० अच् निगडवतः निगडबद्धस्येत्यर्थः। सूतिकान्नं सूतिकाभक्षणमुद्दिश्य यत् पक्वं तत्कुलजैरपि न भक्ष्यम्। पर्य्याचान्तम् एकपङ्क्तिस्थेषु बहुषु भुञ्जानेषु यदि कश्चिदाचमनं करोति तदा तत्पङ्क्त्युपविष्टानां तदन्नमभक्ष्यम्। अनिर्द्दशं जननाशौचिनोऽन्नं तेनानिर्द्दशाहं प्रेतान्नमित्यनेन न पौनरुक्त्यम्। "सूतके तु यदा विप्रो ब्रह्मचारी विशेषतः। पिबेत् पानीयमज्ञानात् समश्नीयात् स्पृशेत वा। पानीयपाने कुर्वीत पञ्चगव्यस्य भक्षणम् त्रिरात्रं भोजने प्रोक्तम्" शङ्खः। एतच्चोभयाशौचपरम् शुक्तं यन्मधुरं कालवशादम्लतां गतमम्लञ्चात्यन्ताम्लताम्। शुक्तेषु दधि तज्जातञ्च भक्ष्यम् "दधि शुक्तेषु भोक्तव्यं सर्वञ्च दधिसम्भवमिति" मनूक्तेः। तदपि गुडादिद्रव्यमिश्रणेऽभक्ष्यमेव "गुडादिद्रव्यसंयुक्तं वर्ज्यं पर्य्युषितं दधि। तथैव यावकादीनि मन्यादिचरितान्यपि" यमोक्तेः। 'सगुडं मरिचाक्तं च तथा पर्य्युषितं दधि जीर्णतक्रमपेयञ्च नष्टस्वादञ्च केनचित्। प्रमादभक्षितैरेभिर्वने पक्षव्रतं चरेत्" स्मृतेश्च "यवगोधूमवर्ज्जं गव्यविकारं स्नेहाक्तं चक्रुषाभवं वर्जयित्वा पर्य्युषितं प्राश्योपवसेत् तथा दधिवर्जं सर्वशुक्तानि" विष्णुः। "केवलानि च शुक्तानि तथा पर्य्युषितानि च। ऋजीषपक्वं भुक्त्वा तु त्रिरात्रं तु व्रती भवेत् शङ्खः। चुक्रुषा व्यञ्जनभेदः। 'अपूपाश्च करम्भाश्च धाना वटकशष्कुलः। शाकं मांसमपूपञ्च सूपं कृषरमेव च। यवागूं पायसञ्चैव यच्चान्यत् स्नेहसंयुतम् सर्वं पर्युषितं भक्ष्येत् शुक्तं तु परिवर्जयेदिति यमः। "अविकारि भवेन्मेध्यमभक्ष्यं तद्विकारकृत्" पर्य्युषितं रात्र्यन्तरितम् स्नेहाक्तं चेद्भक्ष्यं यथाह मनुः। यत्किञ्चित् स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितम् तत्पर्य्युषितमप्याद्यं हविः शेषञ्च यद्भवेदिति" 'चिरसंस्थितमप्याद्यं सुस्नेहाक्तमपि द्विजैः। यवगोधूमजं सर्वं पयसाञ्चैव विक्रियेति" च अनर्चितं निन्द्याधरीकृतम्। अवीराया निःसम्बन्धायाः पतिपुत्रहीनायाः सम्बन्धिन्यास्तु पितामह्यादेर्न दोषः। नगर्य्यन्नं नगरिणो नगराधिपस्यान्नम् "नगराधिपतेः शत्रोः पिशुनानृतिनोस्तथेति" अ० पु० एकवाक्यात्। अवक्षुतं क्षवथुसहितम्। "वृत्त्यन्वेषी नटानान्तु स तु शैलूषकः स्मृत" इति आ० पु० उक्तः शैलूषः। तुन्नवायकः सूचीकर्म्मकृत्, निषादः प्रतिलोमजवर्णसङ्करभेदः। रङ्गावतारकः नृत्यस्थाने गीतवाद्यादिना तदनुगुणतायां प्रसक्तः। वेणः वंशविकारपात्रादिकर्त्ता। श्ववान् मृगयाद्यर्थं कुक्कुरपोषणकृत्। शौण्डिकादयश्च तत्तद्वृत्तिभाजो द्विजाः अन्त्यजानां गुरुप्रायश्चित्तश्रवणात् प्रा० वि०। शूद्रान्नं शूद्रगृहे न भक्ष्यम्। "शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि। निवृत्तेन न भोक्तव्यं शूद्रान्नं तदपि स्मृतम्"। 'निवृत्तेन शूद्रान्नान्निवृत्तेनेति' आ० त० रघु० "यथा यतस्ततो ह्यापः शुद्धिं यान्ति नदीं गताः। शूद्राद्विप्रगृहेष्वन्नं प्रविष्टं तु सदा शुचि" अत्रिः। तेन स्वगृहागतस्यैव शुद्धत्वं तद्गृहगतस्य शूद्रान्नत्वमिति भेदः। "यः शूद्रेण समाहूतो भोजनं कुरुते द्विजः। सुरापीति स विज्ञेयः सर्वधर्मबहिष्कृतः। यः शूद्रेणाभ्यनुज्ञातः कुर्य्याद्वा भोजनं द्विजः। सुरापीति स विज्ञेयः सर्वधर्मबहिष्कृतः" वृह० ना०। "शूद्रान्नेन तु भुक्तेन उदरस्थेन यो मृतः। स वै खरत्वमुष्ट्रत्वं शूद्रत्वं वाऽधिगच्छति। "शूद्रान्नं ब्राह्मणोभुक्त्वा तथा रङ्गावतारिणः। चिकित्सकस्य क्रूरस्य तथा स्त्रीमृग-